गीतगोविन्दः पदभावार्थनामधेय
टीकासहितः
२८४

नं. २८५

गीतगोविन्द टीका पदद्योतनिका । १ [illegible]

२८ पत्राणि

[illegible]

[illegible]

श्री [illegible]

[illegible]

गणेशाय ॥ समस्तगोपसुंदरीविलासरासमाश्रितः । करोतु नामुकं मयेमनोजमानसो हरिः ॥१॥ गीतगोविन्दटीकेयं
पदद्योतार्थचन्द्रिका । मरुदत्तात्मजाकृता मेतां हसंतिविचिन्वतो ॥२॥ नोदाहयन्ति विशदाः स्फुरतानीकसागरे । इति श्रीप
रमानन्दगीतिवर्णनं समीरितो ॥३॥ अथ तत्काव्यस्य द्वादशसर्गात्मकस्य निर्विघ्नसमाप्त्यर्थं मंगलमाशीः सदेवताना
माराधवस्मरणलक्षणं मंगलमादावाचरति ॥ मेघैरित्यादि । राधामाधवयो रहः केलयः एकांतक्रीडा जयन्ति सर्वो
त्कर्षेण वर्तन्ते । कयोः नन्दनिदेशतो नन्दस्याज्ञया चलितयोः प्रस्थितयोः । नंदनिदेशमेवाह त्वमेवेति । हे राधे

ॐ श्रीगणेशाय नमः ॥ मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय । इत्थं नन्दनिदेशतश्चलितयोः
प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥१॥ ४।४।

1 १

अस्मात्त्वमेव राधे इमं कृष्णं गृहं प्रापय । अतएव राधः कोपोक्तो । बालोयं भीरु यतोनानीतस्मात् त्वमेव इमं प्रा
पयेति हेतुः । अतो भयं कथनं नक्तं रात्रौ भीरुः बालत्वाद्भयशीलः । नन्वेतत्कारणं मयि मे वा इति । कस्माद् आकाशं
मेघैर्मेदुरं स्निग्धं तथा वनभुवो वनभूमयः तमालद्रुमैः श्यामाः । कुत्र प्रतिदिनम् [illegible] यमुना
याः कूले प्रत्यध्वकुंजद्रुमम् । अध्वनि कुंजद्रुमे द्रुमसंनिधौ । अध्वानं कुंजद्रुमान् लक्षीकृत्य वा । अत्रापेन
गृह इमं गृहं प्रापयेत्यत्र एतस्य चान्वादेशो द्वितीयाटौस्स्वेनेति सूत्रेण एनादेशः कथं न स्यादिति ।
अन्वादेशाविवक्षितत्वाद्भावात् । किंचिद्विधाय कथनस्य पुनरन्विधाने [illegible] वाक्यान्वादेशः कथ्यते

गीतगुणि स्मनेननीउत्ता विरी कं पुनः कथनमिति। किंचित्तस्मात् पुनरस्मृतते सोन्वादेशइति श्रीपतिदत्तः। अम्बरयोः मिनुज्ज
लसीरित्यमरः। अथ दोभासान्तेदुरजना वित्यपि। अन्ये नीउतौ उकन्तौ छकाइति। निदेशः सीमन्तेति। निकुंजकुंजे।
गहने लतादिपिहितो देशः। एकान्तार्थे रतेषु पदे इति॥१॥ अथ सकलजनमनोरमं श्रृंगाररसगर्भत्तगयवाले निबन्धनेन त
द्यानेन कार्यं प्रतिजानीते। वाग्देवतेति। जयदेवकविरेतं गीतगोविन्दाख्यं प्रबन्धं करोति। कीदृशमित्याह श्रीवासा
सुदेवः कृष्णस्तस्य रतिकेलिः तत्कथनासुरतक्रीडानुवर्णनेन समेतं युक्तं। स्वामधेयमाह। वाग्देवतेति। वाग्देवी गिरादेवता
सरस्वती तस्याश्चरितेन प्रसादमाधुर्यादिगुणसंपन्नेन कोमलकाव्यरचनाविशेषेण विचित्रितं चित्रमालेख्यं युक्तं

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती। श्रीवासुदेवर
तिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबन्धम्॥२॥ ॥४॥४॥४॥४॥४॥४

कृतं चित्तरूपं सद्म स्थानं यस्य सः। अत्र सुदर्शनत्वेन नानावर्णित्वेन। वाग्देवताचरितस्य चित्रत्वेन वर्णनम्। कवित्वप्रति
पादनेन कृष्णकेलिवर्णनेनादिना सर्वतापहारित्वेन च विश्रामस्थानत्वं सद्मत्वाद्वर्णनम्। यस्मात् विविधा
त्थिरतं भवतीति ध्वनिः। पुनः स्वामधेयमाह। कीदृशः कविः। पद्मावती नाम जयदेवपत्नी तस्याश्चरणयोर्द
र्शनादिना चारणेन नर्तनमिति यावत्। तेन चक्रवर्ती सार्वभौमस्तद्गीवा। एतेन तस्य कृष्णनाम्नाधिकारित्वं
प्रतिपादितम्। व्याख्यातं सरसकाव्यकरणे चिकारोऽपि निरूपितः। उक्तं च। शृंगारी चेत्कविः काव्ये जातं रसम
यं जगत्। स एव चेदशृंगारी सर्वं विरसतां व्रजेदिति। केचित्तु पद्मेत्याख्यानविधानेनास्याः सात्त्विकी तस्या
श्चरणयोः चारणोऽनुसेवनेन चक्रवर्ती राजेव निरपेक्षः सदानन्दपानपरत्वेन दारिद्र्यादिदुःखराह
रहितः। शृंगाररसज्ञानमिति भावः। [illegible] विशेषः। सद्म निकेतनमित्यमरः। चरणस्तु कुलीन
मंदरिद्रे च शृंगाररसज्ञानमिति भावः

मात्रा॥२॥

सं प्राप्तिस्वकाव्यस्योत्कर्षदर्शनाति हृन्याभिलोकान्नामितीन्दीतिरसज्ञानरसिकस्मरणे कुतूहलं तुष्यैतेन मनसस्संसारानु
रागं यदि विलासकलासु हावविशेषस्तासु वाञ्छितं कुतूहलं तत्कुतूहलं तत्कुतुकेन दाजयदेवसरस्व
तीं शृणु। कीदृशीं जयदेवसरस्वतीं मधुरकोमलकान्तपदावलीं मधुरत्वं द्विविधं शब्दगतमर्थगतं वा शब्दस्य
गतेषु वक्ता रसार्द्रत्वं अर्थस्य मलत्वयोः किं वैचित्र्यं तदुक्तं मधुरकोमलत्वं द्विविधं शब्दकोमलत्वं यस्यापरुष
त्वे अर्थकोमलत्वं च एवं कोमलता एवं कान्तत्वमपि द्विविधं शब्दगतमुज्ज्वलत्वमर्थगतं मनःश्रोत्रप्रीतिप्रदत्वं तदु

प्र.वं.३

२ यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्। मधुरकोमलका
न्तपदावलीं शृणु तदा जयदेवसरस्वतीम्॥३॥ वाचः पल्लवयत्युमापति
धरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते। शृङ्गारोत्तरसत्प्रमे
यरचनैराचार्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः॥४॥ २

क्तं मधुरकान्तापदावली प्रत्येकं पराप्यनन्तं तां। माधुर्यं द्रवीभावो गुणो रागे द्रवे रसे इत्यमरः॥ ताम् कालिकोविदो
रसस्तु विलासो शृङ्गारादिषु। कलाः स्युश्चतुःषष्टिकलानां कलास्यात्कृत्यनादिषु॥३॥ वाच इत्यादि। उमापति
धरनामालंकरणेन नाम्ना यो वाचः पल्लवयति विस्तारयति तथा च उमापतिधरस्योक्ति सूक्ष्मयोः यादृश
गाविनैव सहृदयाह्लादजनकमिति भावः। शरणं नाम दुरूहस्य गूढार्थकाव्यस्य शीघ्ररचनैः श्लाघ्यः
तस्य। शरणकविरपि गूढार्थत्वाद् [illegible] दुरूह [illegible] नाम [illegible] इति भावः। तथा चर्विशृङ्गारसे

...स्योत्तरः प्रबन्धोऽयं गायेत्यौत्सुक्येन ध्यानं वा ... प्रमेयमुत्तममेव वस्तु तस्य रचनैः कृदित्यग्रंथनैः स्ववाग्मिः ...
...नस्य ... गीतिः ... गायति ... सरस्य ... वान् कोऽपि न स्यात् । ... प्रधानकाव्यरचना ... स्य ...
... रवर्णने ... तस्येति भावः । इतरविद्याध्यापनादिना याजित्वं धोयीकविः उमापतिर्दूत... नामा कविराज ।
श्रुतिधरः श्रुतिः श्रवणमात्रादेव ग्रंथग्राही । तथा तस्यो... इत्यनेन तु तस्य कवितायां कौशलमिति
भावः । ... कारकथनात् राजोपमा । ... कारादेव स्वस्य राजपदवीमानीतवान् । गिरां वचसां ... ॥
... कारसंदर्भरचनाविशेषं जयदेव एव जानाति नान्यः । ... जयदेव कविता ... वर्णे महान् सन्तोष इति ना
... । पल्लवः किसलये ... विटपे विस्तारे वन इति विश्वः ॥ ... प्रमरः ... ॥ उत्तरे त्रातिवाक्यस्या
... त्पत्तिमेव वदति ॥ ४ ॥

प्रलयपयोधिजले धृतवानसि वेदम् । विहितवहित्रचरित्रमखेदम् ॥ केशव धृत
③ मीनशरीर जय जगदीश हरे ॥ १ ॥

... जनमनोरथपूरणाय भगवतोऽवतारपरिग्रह इति ममाप्यभिलाषितं करोत्विति । अवताराणामप्य
... प्रधानतया दशावतारस्तुतिकारेणैव श्रीकृष्णस्तुत्यादौ मीनरूपं स्तौति । प्रलयेत्यादिना । गीतस्य मा
... रागो ... रूपकतालः । रूपकस्याद्भुतं तद्धु ... इति संगीतरत्नाकरः । गीतार्थस्तु हे केशव जय ... । ... नरूपी
... वर्तस्व । जगतां चतुर्दशानां भुवनानामीश्वर निर्वेतः ... । ... अत्रहेतुः । हे हरे ... रतिं ... नाशयामीति ... ।
... शरीरं येन ... मीनस्य मत्स्यस्य शरीरं येन तादृशाऽऽत
... शरीर ... मीनस्य शरीरस्य ... । ... धृतमीनशरीरेति ... तद
... प्रतिपदमनुवर्तमानत्वात् । तदुक्तं ध्रुवत्वाच्च ध्रुवो ज्ञेयः । ... प्रतिपदमनुवर्तमानत्वाद्ध्रुवत्वम् ।
... इत्यादि ... प्रलयजनकाः ... पयोधयः समु
... जननमाह । प्रलयेति । [illegible]
[illegible]

प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदं केशव धृतमीनशरीर जय जगदीश हरे ॥ [illegible] अत्र पयोधिशब्देन जलत्वप्राप्ते पुनर्जलपदोपादानमंतर्दृष्टिरहितत्वेन [illegible] इति वेद्यम् [illegible] एवं भूत शरीर [illegible] ॥ [illegible] मत्स्ये मीनो वैसारिणोऽण्डजः इत्यमरः ॥१॥ कच्छपरूपस्तोति क्षितिरिति हे केशव धृत कच्छपरूप [illegible] कच्छपरूपं येन सः सम्बोधने तथा हे कच्छपावतार त्वं जय जेजेनमाह क्षितिस्तिष्ठति तव पृष्ठे क्षितिः पृथ्वीति [illegible] वर्तमानकालनिर्देशेन संप्रत्यपि तव पृष्ठे क्षितिस्तिष्ठतीति कथंभूते पृष्ठे अतिविपुलतरे

क्षितिरति विपुलतरेतव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप जय जगदीश हरे ॥२॥ वसति दशनशिखरे धरणी
तव लग्ना शशिनि कलंककलेव निमग्ना केशव धृतसूकररूप जय
जगदीश हरे ॥३॥

अतिविस्तारेण पंचाशत्कोटियोजनविस्तीर्णपृथिव्यपेक्षयाप्यधिकाविस्तृते पुनः कथंभूते धरणी [illegible] पृथिव्या धरणेन [illegible] किणचक्रं [illegible] तेन गरिष्ठे [illegible] ॥२॥ वाराहावतारं स्तोति वस [illegible] इत्यमरः ॥ [illegible] इति हारावली ॥२॥ [illegible] सूकररूपं येन तादृश जय [illegible] जेजेनमाह वसतीति [illegible] वसति [illegible] शशिनि चन्द्रे निमग्ना क [illegible] [illegible] चन्द्रस्य सामर्थ्यं दशने प्राप्यते [illegible]

[illegible] देनादृश्यत्वाच्च अत एव पूर्णं चन्द्रे अत्यन्तं दर्शनात्। रदनादशनादन्ता इत्य-
[illegible] न मितियमरनिः॥ कूर्मे स्यात्कमठे रेवद्धो स्यादावेशमात्रके। बोड्मा सेव
[illegible] ति विश्वः॥ ३॥ नृसिंहरूपं स्तौति। तवेत्यादि। हे केशव धृतं नरहरिरूपं येन नरहरिर्नृसिंहः
[illegible] तवकरकमलवरे करो हस्तः स एव कमलवरः कमलश्रेष्ठः तत्र नखं तिष्ठति। कथंभूतं अ-
द्भुतं माश्चर्यं शृङ्गं मग्रं यस्य तत्। अद्भुतत्वमाह। तदलितेत्यादि। दलितो विदारितो हिरण्यकशिपोर्दैत्य-
स्य तनुर्देहः स एव भृङ्गो भ्रमरो येन तत्। भृङ्गत्वमत्र [illegible] रक्तपानादिना भृङ्गाणां क्रमते येन तद्दैत्यः। इदं तनुं श्रीनृसिंह-

तव करकमलवरे नखमद्भुतशृङ्गं दलितहिरण्यकशिपुतनुभृङ्गं। केशवधृतन-
रहरिरूप जय जगदीश हरे॥ ४॥ छलयसि विक्रमणे बलिमद्भुतवामन पदनख-
नीरजनितजनपावन। केशव धृतवामनरूप जय जगदीश हरे॥ ५॥ ४४४

रकमलाग्रेण नखैर्नागमिवाविदारितावानित्यद्भुतत्वं [illegible] कमलत्वनिरूपणेन म[illegible] हिरण्यक-
शिपुकाजस्य श्रीनृसिंहकरांबुजादिन्[illegible] तिस्फुटमत्वं [illegible] नितम्। पुनर्नखः करजोऽस्त्रीनखो[illegible]
नाग[illegible] समरः। शृङ्गं प्रभुत्वे विकुरे चिन्हे क्रीडाम्बुयन्त्रके। वृषाने [illegible] जोऽस्त्रागेऽस्यात्कूर्शिविशी-
के इति विश्वः। तनुः कायेकृशे वा [illegible] इति वि[illegible]। द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरा-
लयं इत्यमरः॥ ४॥ वामनरूपं स्तौति। छलयसीत्यादिना। हे केशव धृतवामन

(5)

नृसिंह रूपधे ताधरा य ८

रूपधृतं वामनस्य स्वरूपस्य रूपं जेन तादृश जजजय · वामनावतारप्रयोजनमाह । छलयसीति । हे अद्भुतवाम
न अयं रूप वामन । विक्रमे पराक्रमेण बलिं दैत्यं छलनत्वं मिवं छलयसि · एवं नारते कृष्णा भगवानुपेन्द्रो वामनरूपं धृ
त्वा बलेः पदत्रयं परिमितां भूमिं प्रार्थ्य पश्चाद्बृहद्रूपं प्रकटीकृत्य चतुर्दशभुवनैरपि पदत्रयं तोपूरणे तदपरा
धे तं बद्ध्वा अधः क्षिप्तवानिति · अद्भुतत्वमेवाह · पदनखेति · पदनखस्य सं[illegible]जन्नीरं गंगाजलं तेन जनितं भुत्यादि
तं जनानां पावित्र्यं जेन तादृश · अत्रापि वामनपुराणे · प्रवर्द्धमानस्य भगवतस्त्रिविक्रमस्य चरणाग्रे नखाग्रे

प.१ मजे२

४ ५

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन । केशव धृतवामन
रूप जय जगदीश हरे ॥५॥ क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवता
पं केशव धृतभृगुपतिरूप जय जगदीश हरे ॥६॥

४

ण विदीर्णे ब्रह्माण्डस्य पार्थिवावरणे तेन च वर्त्मना तद्ब्रह्माण्डाद्बहिर्भ्रान्त्वा जलं तदागतं जलं तत्र नो ब्रह्मदत्तार्घ्यजलैरे
कीभूतं प्रक्षेरज · त्रिविक्रमेणानन्ते लोकं प्रापीं गंगेति प्रसिद्धं लोकान्यावयन्तीति · त्रैलोक्यकीर्तिनापि वामनेन त्रुस्ना
एडुअस्यावनजनादार्जमिति श्रुतिः · वंमेनोनस्त्रीजपानीजनीरन्ज्ञीवाम्बुशम्बरसित्यमरः ॥५॥ परशुरामावतारं स्तौ
ति · क्षत्रियेत्यादि · हे केशव धृतभृगुपतिरूप · धृतं भृगुपतेः परशुरामस्य रूपं जेन तादृश जजजय · एतदवतारप्रयो
जनमाह · क्षत्रियेत्यादि · क्षत्रियाणां रुधिराणि प्रचुराणि यत्र तादृशो पयसि कुरुक्षेत्राख्ये तीर्थजले जगत्त्रीणि
भुवनानि[illegible] · एवं पुराणप्रसिद्धिः । जदग्निपरशुरामेनैकविंशतिवारमनु
[illegible]कृपाततार्य[illegible] यस्मादेवं स्नपयसि · [illegible] दधित महातीर्थं जातमिति · कथंभूतं जगत
[illegible]नानहत्वात दुधिरैः कुरुक्षेत्रे पंचकुं[illegible]

हनंतसंवतापं शमितो नाशितो भवस्य तापः संसारस्य तापः संतापो येन स्मिन् तन्न प्राणिनां पापसंबंधाद् एवसंतापोस्तिसंस्मरणस्ज्ञानेन तु कल्मषं पापं नाशं प्रसन्नता मनसो स्तिना वः संतापस्य ज्वलनेमज्जत संतपनाश उचित एवेतिद्विनेः कुधिरोस्मकेशोन्को कुधिरं कुंकुमाघृणेजः इति विश्वप्रकाशः । भवः संसारसंतापे स्मृजः शंकरजन्मसु इत्यमर ॥ ६ ॥ पुरुषमाधमारू । वितरसीति । रणे संग्रामे दिक्षु दशमुखमौलिबलिं दशमुखस्य रावणस्य शिरोमौलयः किरीटमस्तकानि मुकुटानि वा तान्येव बलिं उपहारं वितरसि ददासि । कथंभूतं दिग्पतिकमनीयं दिशां पतयः इन्द्रादयस्तेषां कमनीयं मनोज्ञं कमनीयं किरीटम् ह्र्दु मूर्ज सुमौलिके शोच सज्जते कशेपहारजोः पुंसि बालिः शालपंगजेस्त्रियामित्यमरः ॥१०॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयम् । केशव धृतरघुपतिरूप जय जगदीश हरे ॥ ७ ॥ वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभम् । केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥ ४ ॥

बलभद्रावतारं स्तौति वहसीत्यादिना हे केशव धृतहलधररूप हलधरस्य बलभद्रस्य रूपं येन तादृशावतार जय जय । बलभद्रावतारस्य लीलामाह वहसीति । त्वं विशदे शुभ्रे वपुषि देहे जलदाभं सजलमेघनीलं वसनं वहसि धारयसि । कथंभूतं हलहतीति हलेन हतिः हननं तद् भीत्या तद्भयेन मिलिता या यमुना तस्या आभा इव आभा यस्य ... प्रमा नीलवर्णं कंपयवतित एवेति भावः । एवं हि भारते कथा कदाचिद् ... वृन्दावने वारुणीं पीत्वा गोपीभिः सह विहरता ... तामलप्रनापोस्मिति मत्वा गर्वेण नान्तिकमागता इति यमुनां रोषात् हलाग्रेणाकृष्य आनीतेति । हलधरपदेनानन्तहार्थ ... तवानिस्पवतावज्ञजनं तद्वतिम ॥

...धृतबुद्धस्वरूपेणशरीरेणयुक्तं विग्रहं यस्य सः तस्य सम्बोधनं धृतबुद्धशरीर इत्यादिः स्वेत विमादः स्वेत पाण्डुराः... सनुगमा अनुवाद
नेवामाक्येत नवसनमास्त्रि पासितिव। नीतिसाधुसकपरोरिति विस्त्व॥ ९॥ बुद्धावतारं स्तौति निन्दसीत्यादिना।
हे केशव धृतबुद्धशरीर धृतं बुद्धस्य शरीरं येन तादृश त्वं जय जय। बुद्धावतारे वेदानिन्दकस्य स्तुतिं न युक्तेत्या
शेषयाह निन्दसि यज्ञविधेः श्रुतिजातं यज्ञविधानबोधकं वेदसमूहं निन्दसि नतु सर्वमित्यर्थः। तदपि न गर्
हितमुक्तमित्याह सदयहृदय दर्शितपशुघात सदयहृदयेन दर्शितः पशुघातो येन तादृशः। यज्ञकर्तुर्वेदो पशुघातं बा
तं बोधयतीति निन्दसीति भावः। सर्वथा महतो निन्दानयुक्तेत्यत्रेतुः। सदयेति दया कृपा तया सहितं हृदयं यस्य

५ निन्दसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं केशव धृतबुद्धश ५
रीर जय जगदीश हरे॥ ९॥

5

तः सम्बोधने हे सदयहृदय जहा सदयहृदयेन दर्शितः पशुघातो येन तं। अतो न हिंस्यात्सर्वा भूतानि सम्मोमसकेसमिन्ना
मेसुन्क ऽग्नीषोमीयं पशुमालभेत। तो अश्वमेधेन यजेत तरति ब्रह्महत्यां। पशुजाङ्गलचातुर्मास्ययागादि
यज्ञफलं भवतीति निन्दसि। अयं भावः। विविधवाक्यैः स्वर्गादिफलपुरस्कारैर्यज्ञे प्रवृत्तान् जनान् बहून् दृष्ट्वा निरपराधि
पशुं समालभन्तान् दृष्ट्वा तुच्छफलं स्वर्गादि दृष्ट्वा पशुपुरुषार्थमोक्षफलेजनानप्रवर्तयितुं कृपया हिंसाबोधकवेदभागं निन्दां
करोषि न तु सर्वथा वेदनिन्दायामेव तत्परो। पशुघातिनां मोक्षमार्गे प्रवर्तनं च दयाप्रयोजनं इत्यादि व्याख्या
यां अहह इत्यव्ययं खेदे इति विस्त्वः। वेदेष्वपि श्रुतिः ... जागदीशं अनुसरतीति विस्त्वः॥ ९॥

गद

...ओ इत्यवतारं स्तौमि। म्लेच्छेत्यादिना। हे केशव धृतकल्किशरीर धृतं कल्किनः शरीरं येन तत्संबोधनं जय जगदीश हरे पूर्ववत्।

...तस्य कल्किनः शरीरं प्राप्य निधनं यत्र इत्यर्थः कथमिति चेत् यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं। इति भगवदुक्तिरित्याह। म्लेच्छनिवहेत्यादि। त्वं म्लेच्छसमूहमारणे धूमकेतुमिव करवालं खड्गं कलयसि धारयसि कथं भूतं किमपि निर्वचनीयं करालं भयंकरं कमिव धूमकेतुमिव उत्पातग्रहाविशेषमिव। यथोदिते तस्मिन् करवाले सर्वलोकानां नाशो भवतीति करवालस्य धूमकेतुसाम्यं अन्यस्मिन् प्रोदिते धूमकेतौ तस्मिन् तोऽपि नाशो भवतीति ध्वनिः ... धूमकेतुरिव ... म्लेच्छानां ... इव। ...

खक्रम

(6) म्लेच्छनिवहनिधने कलयसि करवालम्। धूमकेतुमिव किमपि करालम्॥ केशव धृतकल्किशरीर जय जगदीश हरे॥ १०॥

म्लेच्छनिवहनिधन इत्यत्र ... निधने सप्तमी इत्यनेन ... सप्तमी। ... इत्यमरः। निधनं ... इति विश्वः। ... निस्त्रिंश चन्द्रहासासिरिष्टयः कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् इत्यमरः॥ धूमकेतुः ... तोवन्हावुत्पाते ... इति विश्वः॥ कराले ... ॥ १०॥ अस्यैकावतारपुरस्कारेण भवतः स्तुतिं कृत्वा ... दशावतारपुरस्कारेण श्रीकृष्णं स्तौति। श्रीजयदेवकवेरिदमिति। हे केशव ... दशविधरूपधृतानि दश ... विधानि रूपाणि दश ... तत्वं जय जय जयदेवः कविः ... गीतेन स्वनाम ... कथंभूतं सुखदं ... मनः ... निवहजनानां। श्रीजयदेवेति ...

पदं पुनः कथंभूतं शुभदं मंगलप्रदं कृष्णकीर्तनत्वात्॥ अत एव भवसारं भवे संसारे सारं श्रेष्ठं महाशुनरूपं वा॥ अत एवोदारमहत्॥ विद्याविद्योधकारे चेत्यमरः॥ उक्तं नास्तितमुदितमिति च॥ उदारो दाने महतीति विश्वः॥ कल्पा नेमं गतं श्रुणु नम॥ सारो बले स्थिनाशोन्यायेच नीरे चयने च सारम्॥ वरणेय सारमुदाहरन्तीति विश्वः॥११॥ श्रीशावता रेषु तु वासं प्रतिपरिपूर्णं स्वरूपमवतारिणां श्रीकृष्णं स्तौति॥ वेदानित्यादि॥ कृष्णाय परिपूर्णस्वरूपेण श्रीकृ रूपधारिणे तुभ्यं नमः॥ मीनाद्यवतारवानीश्वरस्त्वमेवेत्याह॥ दशाकृतिकृते मीनादिदशरूपधारिणे तुभ्यं नमः॥ तत्र दव तारश्रीजनमाह॥ वेदानुद्धरते मीनरूपेण वेदोद्धारं कुर्वते॥ जगन्निवहते कच्छपरूपेण धारयते॥ भूगोलं भूमिमुद्ब

श्रीजयदेवकवेरिदमुदितमुदितमुदारम्॥ शृणु सुखदं शुभदं भवसारम्॥ केशव धृतदशवि धरूप जय जगदीश हरे॥११॥ वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते ब लिं छलयते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥१॥ वराह

रूपेण बिभ्रते॥ दैत्यं हिरण्यकशिपुं दारयते श्रीनृसिंहरूपेण विदारयते॥ पुनः कथंभूताय बलिं छलयते वामनरूपेण वंचयते॥ क्षत्रक्षयं परशुरामरूपेण दुष्टक्षत्रियाणां क्षयं कुर्वते॥ पौलस्त्यं जयते॥ पौलस्त्यं रा वणं जयते श्रीरामचन्द्ररूपेण जयते॥ हलं दुष्टानियमनप्रयत्वेन कलयते बलभद्ररूपेण धारयते पुनः कथंभूताय कारुण्यं कृपामातन्वते॥ बुद्धरूपेण विस्तारयते पुनः कथंभूताय म्लेच्छान् कल्किरूपेण मूर्छयते नाशयते॥ आकृतिः कथिता रूपमात्रावयवादिषु॥ जातिः शरीरे निचयप्रकाशः॥१॥

राम ५

... बीजमन्त्री त्युक्तं केलिरवनायको कुर्जविनान नवनीतिम मस्तनायकचूडामणे भगवतः श्रीकृष्णस्य लीलाल
...त्वर्णितन्नैव मंगलान्तरमप्याचरति श्रितेत्यादिना। गीतस्यास्य गुर्जरीरागः। ... मण्ठः। नु नमामात्र प्रच्छन्ने
... लिनिरंतरम्। प्रतिमण्ठः सप्तं गारेसान ... गीयते। रसेइति नक्षणम्। गीतोयस्तु हरे हरे देव जय जय। आदेरहि
र्वचनम्। इदं च ध्रुवपदम्। नायकगुणानाह। श्रितेत्यादि। श्रितमाश्रिते। कमलायाः ननुयः कुचमण्डलं तेन सतया सम्बोध
ने। तथा च सकलनायिक मुकुटमनेः लक्ष्म्या अपि केलिकथथनेनरतिकौशलरूपो नायकगुणउक्तः। ननु ...
धनाढ्यत्वमपि सूचितं। कथंभूतः धृतकुंडलयेः धृते कुण्डले येन ... तथा। पुनः कथंभूत कलिता ... ललिता

श्रितकमलाकुचमण्डल धृतकुण्डल ए। कलितललितवनमाल जय जय देव हरे ॥१॥
दिनमणिमण्डलमण्डन भवखण्डन ए। मुनिजनमानसहंस जय जय देव हरे ॥२॥

मनोहरा वनमाला वरणपर्यन्ता वनमालिनी ... येन सतया सम्बोधने। एतद्विशेषणाद्वयेन नव्यत्वमुक्तं। कमला
श्रीर्लक्ष्मीः ... कौस्तुभादि ... अपादप्रतिमां माला विदुर्वुधाः ... ॥१॥ पुनः कथंभूत दिनमणि इत्यादि।
दिनमणिः सूर्यस्तस्य मण्डलं तस्य मण्डनं अलंकारभूत। ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासन
सन्निविष्टः। केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः इति पुराणप्रसिद्धिः। एतेन स्थिरसु
खित्वमुक्तम्। पुनः कथंभूत भवखंडन भवं संसारं खंडयतीति भवखंडनः ... तथा संबुद्धौ। अनेन सामर्थ्यम
... मुक्तम्। पुनः कथंभूत ... मुनिजनेति। मुनिजनानां सनकादीनां मानसं चित्तं तदेव मानसं सरोवरं तस्मिन् हंसो
... नायकगुणउक्तः। मुनिजनेति। मुनिजनानां ... मानससरोवरस्येन निरूपणम्। भगवतश्च सु
... मुनिजनमानसस्य ... ज्ञानमानससाधारणधर्मेण ... निरूपणो
निजनमानसस्य ... त्वादिनाम ...

(7)

दयं परास्यति नूपकमलेकारः। तदा कुः निजनारोपलोपाजः स्यादारोपः परस्परः। तत्परस्मिन् दिने [illegible] वाचकेन देवाजित्वेन
मानसे सरसि स्थितं इति विग्रहः॥२॥ पुनः कथंभूत कालियेत्यादि। कालियनाम्नो विषधरस्य गंजनो तिरस्कारकः अनेन
[illegible]मुक्तं। हे जनरंजन जनान् मधुरवचनादिना रंजयतीति जनरंजनस्तत्संबुद्धौ। अनेन मधुरवचनवत्त्वनाम[illegible]गुणउक्तः। आभी
रयदुकुलेति। यदूनां कुलमेव नलिनं कमलं तस्य दिनेशो हे सूर्य प्रकाशकत्वात्। एतेन कुलीनत्वनामक गुण उक्तः। आशी
विषो विषधरश्चक्री व्यालः सरीसृप इत्यमरः। वा पुंसि पद्मं नलिनमरविंदं महोत्पलमिति च॥३॥ पुनः कथं हे मधुनाम्नो
मुरनाम्नो नरकनाम्नो दैत्यस्य विनाशन हे विनाशकारिन्। अनेन नाममध्ये मुक्तं हे गरुडासन ए। अनेन महदैश्वर्यमुक्तम्

दा२

7

७॥ कालियविषधरगंजनजनरंजन ए। यदुकुलनलिनदिनेश जय जय देव हरे॥३॥ ८
मधुमुरनरकविनाशन गरुडासन ए। सुरकुलकेलिनिदान जय जय देव हरे॥४॥
अमलकमलदललोचन भवमोचन ए। त्रिभुवनभवननिधान जय जय देव हरे॥५॥

गरुत्मान् गरुडस्तार्क्ष्य इत्यमरः। हे सुरकुलकेलिनिधान सुरकुलकेली नंदयतीत्यर्थः [illegible] नां निदानत्वात् आदिकारण।
अनेनापि सामर्थ्यमुक्तं। त्रिदशा विबुधाः सुरा इत्यमरः। निदानं त्वादिकारणमिति च। [illegible] सज्जनगणपोषकेत्युक्तमितीति
यदुकुलनिति [illegible]॥४॥ पुनः कथंभूत अमलेत्यादि। अमलं निर्मलं यत्कमलं तस्य [illegible] दलं पत्रं तत्सदृशे लोचने यस्य तत्संबुद्धौ।
अनेन नयनश्रीमुक्तं। हे भवमोचन भवे जन्म तस्मात् प्रपन्नान् मोचयतीति सः। हे [illegible] अत एव भवखेजन इत्यनेन पोन
अनेन नयनश्रीमुक्तं। अत्र तु भवबंधस्य जन्म परंपरा मोक्षप्रदत्वमुक्तं। अनेन प
र्यन्तं तस्य भवपदस्य जगत्पूरतत्पालकारित्वमुक्तं। अत्र तु [illegible] हे त्रिभुवनभवननिधानेति। त्रिभुवनमेव [illegible] तदेवानि
नवरूपमोक्षप्रदत्वेन स्वाभिलषगुणरूपोनामगुण उक्तः। हे त्रिभुवनभवननिधानेति। [illegible] अनेनापि महदैश्वर्यमुक्तं। दां [illegible]
आसस्थानं तस्य सतथा। यद्वा त्रिभुवन[illegible] [illegible]
अमरः। भवनं नाम वेश्मनोरिति विश्वः। निधानं त्वाधारेऽपि निधौ च त्वितिस्त्रियाम्॥५॥

हृदये [illegible] कृतवत्सल जनकसुता सा: सीता सा: कृतानि भूषणानि [illegible] कारिका [illegible] दीनि येन स तथा [illegible]
मा [illegible] कौ [illegible] भूषस्त्वमुखे [illegible] नामक गुण उक्तः। हे जितदूषण जितो दूषणो नाम राक्षसो येन स तथा। जितानि स्व [illegible]
[illegible] दूषणानि स तथेति वा। शमरे संग्रामे शमितो नाशितो दशवदनो रावणो येन स तथा। संबुद्धौ। एतेन परमात्मनि मानिनो रावण
[illegible] नामिमाजिल्व रूपो नामक गुण उक्तः। रावणस्य तारपेषु भवनेनिनवच्छु मानत्व रूपोदिनामकगुण उक्तः। वाने: शिरसि
[illegible] केतिचित्र: ।६॥ कथं भूत अभिनवो जलधरस्तद्वत् सुन्दरः। धृतो मन्दरो येन स तथा। अनेनापि [illegible] मेवोक्तं। हे धृतमन्दर
[illegible] धृत: क्षीराब्धिमंथनार्थं [illegible] एवंभूत विद्यो मां मंथानदण्डभूतो येन स तथा। अनेनापि सामर्थ्यमेवोक्तं। हे श्रीमुखचन्द्रचकोर श्रि-

बे२

जनकसुताकृतभूषण जितदूषण ए। समरशमितदशकंठ जय जय देव हरे ॥६॥

अभिनवजलधरसुन्दर धृतमन्दर ए। श्रीमुखचन्द्रचकोर जय जय देव हरे ॥७॥

तव चरणे प्रणता वयमिति भावय ए। कुरु कुशलं प्रणतेषु जय जय देव हरे ॥८॥

तव चरणे प्रणता वयमिति भावय ए। कुरु कुशलं प्रणतेषु [illegible] कोरत्वेन च्या-
जातनन्दस्य मुखमेव चन्द्रस्त्र [illegible] दिकारित्वात्। तस्य चकोरश्चकोरसमान नयनन्द्राक्ष सुधापानसोत्कंठेन भगवतश्च कोरत्वेन
[illegible] मितिः अनेनापि रतिकौशलमेवोक्तम्। अत्यग्रो जनिनवो नव्यो नवीनो नूतन [illegible] त्यमरः। अनजास्तपदास [illegible] नामकगुणा
ख्यातमिति। अनेनापि रतिकौशलमेवोक्तम्। [illegible] नव: [illegible] नामा यान्तु
उक्तः। नामकगुणा: [illegible] कथिता:। त्यागी कुलीन: कुशलो रतेषु कल्य: [illegible] वनाढ्य:। नव: [illegible]
नगो [illegible] स्त्रीणां मत: [illegible] नामकः स्यात् ॥७॥ श्रीकृष्णस्तुला [illegible] प्रतिसर्गं [illegible]
[illegible] तव इत्यादिना। यत्तव चरणे प्रणता इति [illegible] जय जय [illegible] कुरु कुशलं [illegible] मधुना
हरे जय देव [illegible] मंगलम्। गीतविशेषः। [illegible] मुदमानं दकुरुतें [illegible] नीतमुल्लसि [illegible] गीतं [illegible]
[illegible] मः। [illegible] कुर्वंता [illegible] गीतदोषान्विदुबुधाः [illegible] गीतं [illegible] जायते ॥२॥

ौ कृष्णेनापलक्षितो विशेषगुणानक्थयन् नेवासो रूपं [illegible] नमाय [illegible] पयेति। मधुसूदनस्य हृदयं वो युष्माकं प्रियं वांछि
तमनुपूरयतु अनुपूर्णं करोतु। कथंभूतमुरः पद्मा लक्ष्म्याः पयोधरतटी स्तनप्रान्तस्तस्याः परिरंभः परिरंभणं तस्मिन् लग्नं
काश्मीरं कुंकुमं तेन मुद्रितमिव। मुद्राचिन्हविशेषस्तद्युक्तमिव। पुनः कथंभूतं खेलति क्रीडां करोतीति अनंगे कंदर्पे सति खेदः
तस्माज्जातः स्वेदाम्बु प्रस्वेदजलं तस्य पूरः प्रवाहो यत्र तादृशं। एतेन चिरालिंगन काश्मीरस्य शुष्कत्वेपि स्वेदसंबन्धेन मुद्राद्योतक
त्वं व्याख्या। किंविशिष्टमिव। व्यक्तानुरागमिव। व्यक्तः प्रकटी[illegible] अनुरागः स्नेहो यत्र तं हृदयमिव। [illegible] अनुरा
[illegible] हृदयस्य [illegible] भावेन [illegible] कुंकुमरागव्याजेन बहिर्निःसृत [illegible] इति भावः। मुद्रास्य जातास्येति मुद्रितमिति तारकादित्वादितच्

श्रीजयदेवकवेरिदं कुरुते मुदं। मंगलमुज्ज्वलगीतं जयजयदेव हरे। ९॥ प
द्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य। व्यक्तानुराग
मिव खेलदनंगखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं नः॥ १॥ ॥४॥ ४॥

लक्ष्मीः पद्मालया पद्मेत्यमरः। स्त्रीस्तनौ द्वौ पयोधराविन्यपि। परिरंभः परिष्वंगः संश्लेष उपगूहनमित्यपि च। काश्मीरजन्मकुंकुमं प्रोक्तं
टंक पुष्करमूलं [illegible] इति विश्वः। [illegible] इत्यमरः। कंदर्पो दर्पको नंग इत्यादि। जलप्रवाहे पूरः स्यादिति विश्वः। अनेनास्य
[illegible] अनुरागकथनेन [illegible] प्रणयो नाम [illegible]। तदुक्तं शृंगारतिलके [illegible] एवं तो
[illegible] ॥ १॥ कविः शृंगाररसप्रधानं भगवत्केलिवर्णनं चिकीर्षुस्तत्प्रसंगा[illegible]
[illegible] तदन्तिका [illegible] चरितानि वर्णयन्तु प्र
[illegible] शृंगाररसस्योत्कृष्टता [illegible]
[illegible]। वसंत इत्यादिना। विप्रलंभस्योत्कर्षं प्रतिपादयन् [illegible] विप्रलंभेन विना पुष्टिमश्नुते। क[illegible]

[illegible]वयवसादे भूत्वा व्रंगो निजायते॥ इति कारिकास सखी सखी वसंते सरसं वर्णयामास देवराधामिदं वच्य[illegible] माण मूचे उवाच इ
[illegible]से भूतां राधां॥ अवयवैरंगैः उपलक्षितां॥ कथं भूतैरंगैः वासन्तीति॥ माधवीलतापुष्पवत्कोमलैः॥ पुनः कथंभूतां
कांतारे महारण्ये भ्रमंती॥ अत्र हेतुगर्भविशेषणमाह॥ बहुविहितेति बहुधा बहुधा विहितं कृष्णस्यानुसरणमनेषणं
ययाता॥ अत्रापि हेतुः कंदर्पज्वरेण जनिता चिन्ता तया आकुलता व्याकुलितता तया॥ अमंदमाधिकं यथा स्यात्तथा
वलद्बाधां प्रवर्द्धमानपीडाम्॥ अवयवैरित्यत्र जटा[illegible] पसमद्दृशां दिति वहूरोमणां[illegible] नांतो[illegible] तथैव सीनायकेजनः॥
तल्लक्षणं कुत्रचित् कारणोपलक्षणाः पतितेशा नौरंगतः कृत्वा वधीन[illegible] सांद्रोजितप्रेजसीजया॥ वासन्तीमाधवीलता॥
[illegible]मरः॥ महारण्ये दुर्गपद्धे कांतारपुन्नपुंसकमित्यपि॥ पीडाबाधाव्यथादुःखमित्यपि॥ २॥ किमवदत्साहस्र[illegible]सिनादि॥

वसन्ते वासन्तीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी॥ ३॥
ललितलवंगलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बि
तकोकिलकूजितकुंजकुटीरे॥ १॥ विहरति हरिरिह सरसवसन्ते। नृत्यति युवतिजनेन
समं सखि विरहिजनस्य दुरन्ते॥ ध्रु॥

गीतस्यास्य वसन्तरागो यतितालः॥ ताललक्षणं कोहलेन[illegible] घातेन प्लुतेनान्तः प्रकीर्तितः॥ हे सखि॥ इह सरसे वसन्ते
मासे रसोत्कर्षान्विते वसन्ते हरिः कृष्णो हरिः॥ क्रीडतीत्यन्वयः॥ क्रीडाप्रकारमाह॥ नृत्यतीत्यादि॥ युवतिजनेन समं सह नृत्यति॥ कथं भू
ते वसन्ते विरहिजनस्य वियोगिजनस्य दुरन्ते दुःखेनान्तः समाप्तिर्यस्य सः॥ तस्मिन्नित्यर्थः॥ अयं च विवक्षितार्थः। [illegible]
युवतीभिः सह क्रीडतः कृष्णस्य ते च विरहिजना[illegible] दुरन्तो न भविष्यतीति भावः॥ इदं च ध्रुवपदम्॥ सा
केनापि दृश्यते सहेत्यमरः॥ वसन्तस्य स्वरूपमाह॥ ललितेति॥ ललिता मनोहरा या लवंगलता तस्याः परिशीलनेन संपर्केण

कोमलो मृदुलो मलजसमानो मलयाचलस्य ... वायुस्तेन युते तस्मिन्। पुनः कथंभूते वसन्ते मधुकरनिकरेण भ्रमरसमूहेन करम्बितेति मि

श्रिता ये कोकिलास्तेषां कूजितैः स्वरैः कुंज एव कुटीरो लघुकुटी यत्र तस्मिन्। समीरमारुतमरुत जगत्प्राण समीरणा इत्यम

रः। मधुव्रतो मधुकरो मधुलिण्मधुपालिन इत्यमरः। सोमोद्य ... निकरव्रातवारसंघातसंचया इति च। मिश्रिते पिकरम्बितमिति वि

श्वतः। अन्याकुटी कुटीर इत्यापापि॥१॥ वसन्तस्य ऋतुरन्त नामाह। उन्मदेत्यादिना। उन्मदश्चासौ मदनो यत्र तादृशो मनोरथो येषां तेषां

मेवं भूतानां पथिकानां वधूजनस्तेन जनितो विलापो यस्मिंस्तस्मिन्। तथा तादृशो बकुलप्रकाशो ... पुष्पगुच्छो यस्मिंस्तस्मिन्

कुलेन ... यत्र ... विस्यः। केसरे बकुल इत्यमरः। कलापो भूषणे बर्हे तूणीरे संहतावपि इति विश्वः॥२॥ पुनः

पुनः कथंभूते नालिकुले भ्रमरसमूहे संकुलो व्याकुलो ... कुसुमसमूहेन निराकुलो निर्भरेण ... बकुलकलापः केसरस्त

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे। अलिकुलसंकुलकुसुमसमूहनिरा

कुलबकुलकलापे॥२॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले। युवजनहृद

यविदारणमनसिजनखरुचिकिंशुकजाले॥३॥ ॥४॥ ॥४॥ ४॥४॥ ४॥

पुनः कथंभूते वसन्ते मृगमदस्य कस्तूरिकायाः सौरभस्य रभसः सौरभवेगस्तस्य वशंवदा आत्मानि। आजल्पवादिनी नवदलमा

लानवनपत्रपंक्तिर्यस्य स तमालो यस्मिंस्तस्मिन्। कथंभूते युवजनानां तरुणजनानां हृदयं विदारयतीति विदारणा

स्तेन मनसिजस्य कामस्य नखास्तेषामिव रुचिर्दीप्तिर्येषां ते तादृशाः किंशुकाः पलाशकुसुमानि तेषां जालं समूहो यस्मिंस्ता

दृशा किंशुकजालानि पलाशकुलिका यस्मिन् इति वा॥ अत्र पलाशपुष्पाणां कामनखसादृश्येन युवहृदयविदारणात् ... रुचिर्मणस्सिज

शिजनखस्य मदरूपं व्याख्यातं। मृगनाभिर्मृगमदः कस्तूरी मृगइत्यपि॥ रभसो हर्षवेगयोरिति विश्वः। संवरारिर्मनसिज

इत्यमरः। रुचिर्मयूखे शोभायामभिष्वंगाभिलाषयोरिति विश्वः। पलाशो किंशुक इत्यमरः। जालं गवाक्ष आनाये

... दत्तदज

कारके ... इति विश्वः॥३॥ पुनः कथंभूते वसन्ते मदनस्य महीपतिस्तस्य च्छत्रः कनकदण्डः सुवर्णी ...

को॰ नः कथंभूते भूवसन्ते मदन एव महीपतिस्तस्य॰ यः कनकदण्डः सुवर्णदण्डस्तद्वत्तेन पुष्पं छत्रं तस्येव रुचिर्यस्य तस्य केशरे
नागकेशरपुष्पस्य विकाशः प्रकाशो यस्मिन्॰ पुनः कथंभूते मिलिताः शिलीमुखा भ्रमरा एव शिलीमुखा बाणा यस्मिंस्तादृ
शं यत्पाटलिपटलं पाटलिपुष्पसमूहस्तेन कृतस्मरतूणस्य कंदर्पतूणीरस्य विलासः शोभा छितं यस्मिन्॰ अत्र पद्ममे मे
यथा जनकत्वेन भ्रमरालीवाणसाम्यं॰ केशरो नागकेशरः कांचनाह्वयस्तु भमरः। अलिर्वाणो शिलीमुखावित्यमरः॰ समूहेप
टलं चित्रलपि नलोपासंगतूणीरनिषंगा इत्यपि॥४॥ पुनः कथंभूते विगलितं गतं लज्जितं लज्जा यस्य तस्य जगतः प्राणि

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे। मिलितशिलीमु
खपाटलिपटलकृतस्मरतूणविलासे॥४॥ विगलितलज्जितजगदव
लोकनतरुणकरुणकृतहासे। विरहिनिकृन्तनकुन्तमुखाकृतिके
तकिदन्तुरिताशे॥५॥

10

गणस्यावलोकितेन दाशितित तरुणकरुणैर्नवीनकरुणवृक्षैः पुष्पविकाशव्याजेन कृतो हास्यो यस्मिन्॰ अत्र हास्यरस
स्य श्वेतत्वात्पुष्पसाम्यम्॰ श्वेतो हास्यत्र कीर्त्तित इतिभरतः। यद्वा विगलितलज्जितानां वियोगिजनानामवलोकिते
न करुणैरर्थाद्वियोगिभिः करुणं करुणारससहितम्॰ यथा स्यादेवं कृतो हासो यस्मिन्निति वा॰ अयः किं विरहिजनाः
कष्टं प्राप्नुवन्ति। लज्जाहित्वा चित्तादौ स्तीतिभावः। वा नावसनाभिज्ञा एव वृद्धाः पुष्पच्चयेऽपि कृतसंचरणा अतस्तु
ताः पुष्पम्॰ पुनः किंभूते वसन्ते विरहिणां वियोगिनि कृन्तनाय च्छेदारणाय कुन्तमुखाकृतिकुन्तस्याग्रभुवविशेष
[illegible] आशादिशा यस्मिंस्तस्मिन्॰ केतकि
स्य मुखमग्रभागस्तस्य चाकृतिर्यस्य तद्दशाम

दंतुरितासीतिपाठः। आकारोस्त्री कुतौ हृस्वो कुचिदित्यत्र क्वचिद्ग्रहणस्य लक्ष्यानुरोधार्थत्वात्कृतहृस्वेन केतकीशब्देन समर्थनीयः। नञ्जित भ्रमरेण अंकितः इत्यत्र नपुंसकेनाबोधकः। कनुणस्तु रसेष्ठ ऋजु कृपाणांकयुग्मा मतेति विश्वः। भ्राशः कुन्तोमरः। निर्मोचनेन ततया व्याप्ते दन्तुरं कथ्यते बुधैरिति धरणिः। दिशस्तु कुमनः काष्ठा आशाश्च हरित इत्यमरः। कृतिं हे दनइति किस्विन्नु वंधासीति केचित्तस्य हृदये विदारयते। तस्य मिकृन्तनामिससाद्धुः॥५॥ पुनः कथंभूतः सन्ने माधविकाजावासेत्याः परिमलेन सौरभेण लालिते मनोहरे। पुनः कथंभूते नवमालतिकापुष्पेण जातिभाजनं गौरवं सुन्के। पुनः कीदृशे मुनिमनसां

10

१०

माधविकापरिमलललिते नवमालतिजातिसुगंधौ। मुनिमनसामपि मोहनकारिणि तरुणाकारणबंधौ॥ ६॥ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते। वृन्दावनविपिनपरिसरपरिगतयमुनाजलपूते॥ ७॥

१०

राम

मपि मोहनकारिणि मोहजनके अन्येषामित्येवं कथमित्यतिशयार्थः। पुनः कीदृशे तरुणानां विलासिजनानामकारणबंधौ स्वाभाविकमित्रे विमर्दोत्थे परिमलो गंधे जनमनोहरे इत्यमरः। पुनः कथंभूते स्फुरंतीके स्फुरमाणा भ्राजमाणा जातिमुक्तलता वासन्तीलता तस्याः परिरंभणेनालिङ्गनेन मुकुलितः पुलकितो मुकुलितैः मुकुलैस्तदेव पुलकोरोमांचस्तद्युक्तः। भूतश्चान्त्रो यस्मिंस्तस्मिन्। भ्रमरलतानानाविकापाखिलेनेनेनद्भूतः आजकस्याधिदेवो मां स्कन्धेनेनावितनरोदरे कोमलो रसः कथितइत्यर्थस्ते नवसन्तस्यामपदैर्ं तत्कुरुति तस्य अतिवलेनेमु कालो पाचरे गनेत्सुकनेति क्रातिमु काय देव धनिनारः।

ं स... दैर्न तन्तस्य दुरन्ततां सरसतां योत्कासं प्रतिक्रीडारता: स्थानविशेषमाह॥ वृन्दावनइत्यादि। वृन्दावनना
यिनि वने हरिर्विहरति इत्यन्वय:। कथंभूते विपिने परिसरे समीपप्रदेशे परित: सर्वतो गते न अनुलाजाजने भूते पवित्रे॥
...तिमुक्त: पुड्रक: स्याद्वासन्ती माधवीलतेति इत्यमर:॥ मुकुलं करोतीति मुकुलयति तदाचष्ट इतीष्टन्नाज्ञावोक्ते सा तेन मुकुलितमिति
... पम्या मुकुलितमेव पुलकसंजातोस्येति तारकादित्वादितच्॥ आम्रश्चूत इति॥ पर्यन्त भू: परिसर इत्यमर:॥७॥ संप्रतिगीता
र्थमुपसंहरन् रचनानितेनूलकर्ममाह॥ श्रीजयदेवकवेरिदं भणितगीतमुदयति॥ कथंभूतं हरिचरणयो: स्मृतिस्मरणं तेन सारं हरिच

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्। सरसवसन्तसमयवनवर्णनम्
अनुगतमदनविकारम्॥ ८॥ दरविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासै
र्वासयन्काननानि। इह हि दहति चेत: केतकीगंधबंधु: प्रसरदसमबाणप्राण
वद्गंधवाह:॥ १॥

11

रणस्मृतिरेव सारो यत्र तस्मिन्निति वा। पुन: कथंभूतं सरसं स्वभावस्य प्रधानं वसन्तसमयसंबंधिनो वनस्य वर्णनं यत्र तत्। अन
एवानुगत: संबंधो मदनस्य विकारो यस्मिंस्तत्॥ ८॥ संप्रति वसंतकालीनवायोरपि विरहिजनसन्तापकत्वमाह॥ दरविदलितेत्या
दिना॥ इह हि अस्मिन्नेव वसंते गंधवाहो वायुश्चेतो दहति॥ चर्थाद्विरहिणां किं कुर्वन् काननानि वासयन्॥ सुरभीकुर्वन्॥ दरं ईषद्वि
दलिता विकासिता या मल्लिवल्लि: मल्लिकालता तस्या: सकाशात् चंचन्त: प्रसरन्तो ये परागा: पुष्परेणवस्त एव प्रकटिता: प
टवासा: पिष्टातका येन॥ कथंभूतो गंधवाह:॥ केतकीगंधबंधु: केतकपुष्पसौरभ्यबंधु:। पुन: कथंभूत: प्रसरत: प्रतिदिशं संच
रतोऽसमबाणस्य कामस्य प्राणवत् प्राणतुल्य: प्रसरता समवा

येन घ्राणेन वानं शक्ति संपन्नो गंधवाहइत्येकमेवपदं वा इकारदर्थं द्यो जइति विश्वः। परागः पुष्परजसीतिविश्वा
तः पटवासक इत्यमरः। गहनं कानने वनमिति च। घ्राणं गंधवाहसुः प्रकीर्तिता इति शब्द्विः धुमक्रमः घ्राण इत्यमरः। गंध
वाहानिलाशुगा इत्यपि॥ १॥ स प्रतिवसंतदिवसानामपि दुरंतत्वमाह। उन्मीलन्नित्यादिना। अमीवसंतसंबंधिनो वासरा
दिवसाः पथिकैः कथंकथमपि महता कष्टेन नीयन्ते समाप्यन्ते। कथंभूता वासराः उद्गीर्ण प्रकटीभूतः कर्णज्वरः श्रोत्र
संतापो जनितो यैः उन्मीलन्ति प्रकटीभवंति यानि मधूनि गंधाश्च तेषु लुब्धा लोलुपा मधुपा भ्रमरास्तैर्व्याधूताः कं

११	उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्ष णप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः॥ २॥ ४॥४॥	११

कंपिता ये चूतांकुरा आम्रमुकुलानि तेषु क्रीडन्तो ये कोकिलास्तेषां काकल्यो ध्वनिकलकलास्तैः कलकला
कोलाहलास्तैः केन प्रकारेण नीयन्त इत्यत आह। ध्यानेति। ध्यानेषु चिंतनेषु यद्वधानं तत्क्षणे प्राप्तो जः
प्राणसमा या स्त्री तत्संगमस्तस्य रसः तस्मादुत्पन्ना ये उल्लासास्तैः उत्साहास्तैः। काकली तु
कले सूक्ष्मे ध्वनाविति त्यमरः। कोलाहलः कलकल इति च॥ ४॥ अनेकेत्यादि। असौ सखी राधिकां पुनराह। पुनः
श्रितवती। किं कुर्वती आरात् दूरे समक्षं मुग्धमधुपदं जगौ। कथंभूतं अनेकनारीणां परिरंभसंभ्रमेणोत्सुकं

नेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारीविलासलालसं मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम्॥ मारादूरसमीपयोरिति अमरः॥ ३॥ तदेव गीतेन कथयति चन्दने त्यादिना। गीतस्यास्य रामकरीरागो रूपकतालः। तल्लक्षणं ग्रन्थान्तरे। गीतार्थस्तु हे विलासिनि विलासशीले राधे वृन्दावने मुग्धवधूनिकरे सुन्दरवधूसमूहे हरिर्विलसति क्रीडां करोति। कथंभूते मुग्धवधूनिकरे केलिपरे क्रीडापरायणे। कथंभूतो हरिः चन्दनचर्चितनीलकलेवरः। पीतवसनः पीतं वसनं यस्य सः। वनमाली वनमाला अस्यास्तीति वनमाली। केलिचलन्मणिकुण्डलमण्डितगण्डयुगः। स्मितशाली। इतीदं ध्रुवपदं गीतस्य सर्वत्र अनुवर्तनीयम्॥ तथा च

(12)

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसम्। मुरारिमारादुपद
र्शयंत्यसौ सखी समक्षं पुनराह राधिकाम्॥ ३॥ चंदनचर्चितनीलकलेवरपी
तवसनवनमाली। केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली।
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे॥ ध्रुवपदमिदम्॥ १॥

राधा वाच्या हि त्वां विना एकाकिनी कन्दर्पतापं सोढुमशक्ता अपि स्वेच्छया विलासे मनसा यतत इति भावः। मुग्धस्य सुन्दरस्य कर्णे रीतिविस्तरः। विलासो भ्रूविक्षेपादिः। तल्लक्षणं तु ग्रन्थान्तरे च। स्थाने स्थाने आसनादीनां नेत्रवक्त्रादिकर्मणाम्। उत्पाद्यते विशेषो यः स विलासः प्रकीर्तितः। कथंभूतो हरिः चन्दनेन चर्चितं अनुलिप्तं नीलं कलेवरं यस्य सः। पीतवसनः वनमाला वक्षसि यस्य सः। पुनः कथंभूतो हरिः स्मितेन शालते शोभत इति स्मितशाली। स्मितलक्षणं तु भरते। ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः। अलक्षितद्विजं धीरं स्मितं उत्तमानां स्मितमुच्यते। केलिचलन्मणिकुण्डलमण्डितगण्डयुगः। गण्डौ कपोलौ।

पिलिच॥१॥ गोपीनांसौंदर्यविलाससाधनानाभिप्रायत्वंवक्तव्यमन्येकेनोवाह॥ पीनेति॥ काचिद्गोपवधूः पीनपयोधरभ
रेणमोसरसमनमोरवातिशयेनसरागंसप्रेमयथास्यात्तथाहरिंपरिरभ्य॥ लिंग्य॥ उदंचितउद्धृतमंचितः पंचमरागोयत्रएवं
यथास्यात्तथानुगायति॥ अनुपश्चाद्गायति॥ अत्रगोप्याःसौंदर्यंपीनपयोधरेत्यादिनाप्रतिपादितंअत्रवैद
ग्ध्यंतुकृष्णस्यपरिरंभोयमं चिनेस्वयंप्रथमंपरिरंभणात्॥ अन्योन्यकृतेहिपरिरंभेस्वंगाररसःपुष्टोभवति॥
रम्यदेशकलाकालवेषभोगादिसेवनैः॥ प्रमोदात्मारतिःसैवयूनोरन्योन्यरक्तयोः प्रकृष्यमाणः शृंगारोमधु
रांगविचेष्टितैरितिदर्शनारूपरेणपुष्टितमस्ति॥ शृंगारेपंचमःस्वरोवाद्यःयेननवतिसर्वेयात्रकथितः॥ तथाचभरतः॥ मध्यमपंच

12

१२	पीनपयोधरभारभरेणहरिंपरिरभ्यसरागम्॥ गोपवधूरनुगायतिकाचिदुदं चितपंचमरागम्॥ २॥ कापिविलासविलोलविलोचनखेलनजनितमनोजम्॥ ध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरोजम्॥ ३॥ ॥४॥ ४॥ ४॥	१२

मम्॥ रसाश्चंहास्यशृंगारयोर्नैवदितिं॥ २॥ कापीत्यादि॥ कापिमुग्धवधूर्मधुसूदनस्यवदनसरोजंमुखपद्ममधिकं
यथास्यात्तथाध्यायति॥ चिंतयति॥ कथंभूतंविलासेनविलोलयोर्विलोचनयोर्खेलनेनजनितउत्पादितोमनोजःकामो
येन॥ त्वर्थतिस्वामिदृश्यन॥ अत्रअन्यस्यापिमधुसूदनस्यध्यानादवैदग्ध्यंतस्यावगम्यते॥ ३॥ कापिकपोले
त्यादि॥ काचिन्नितंवनीगोपीदितंश्रीकृष्णंकपोलतलेचातुममनोमनोहरंयथास्यात्तथाचुचुंबनंकृतवती॥ कथं
भूतंकामपिकामपिनापितुमंत्रयितुंश्रुतिमूलेकर्णमूलेनमितंलास्ता॥ कथंभूतंपुलकैर्ोमांचैरनुकूलंप्रि

ति तथैव स्वयं केऽ अतोऽसौ कोऽनसह सा कान्तमुखचुम्बनं स्वी जनहास्यकरं भवतीति व्याजेन तज्जातदास्यमि-
भाव:। अत्र प्रथमं स्वमुखस्य भेनि कृष्णकपोले रोमांचमुत्पाद्य चुंबनेन तस्या अधीरत्वं घोतितम्॥४॥ केलि-
... कादि ... कोऽनि केलिकलाकुतुकेन दुकूले पट्टवस्त्रे विचकर्ष ... दुकूलेन
... विचकर्षेति केऽ वियोजयेत् कथं ... मंजुलो वेतसो ... तस्मिन् कुंजे गतं प्राप्तं कुत्र विचकर्ष
यमुनाजलकूले यमुनायाः जलं ... मंजुलवंजुलकुंजस्य कृष्णं यमुनाकूलं प्रति क्रीडा ... ।

काऽपि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले। चारु चुचुम्ब नितम्बवती द-
यितं पुलकैरनुकूले॥४॥ केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले। मं-
जुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥ करतलतालतरलवलयावलिकलि-
तकलस्वनवंशे। रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ ०॥०॥

अन्यान्यानुकूलस्य नायिका यस्यां अनुकर्षणाद्वीरत्वं तस्याः ... कुतुके ... मंजु
मंजुलमित्यपि। वंजुलो वेतसः ... विच्छिन्नितविस्त्र:। दुकूले क्षौमे सूक्ष्मांशुके ... ॥५॥ करतले
दी काचिद् युवतिर्हरिणा प्रशंसे स्तुता कीदृशी रासरसे गोपक्रीडाविशेषे सहनृत्यपरा कृष्णेन सह नृत्यं लीला
कथं नृत्ये रासरसे। करतलयोस्तालेन परस्परं वादनेन ... वलयावलिः कंकणपंक्तिः ...
... कलस्वनः। अथवा ... मधुरस्वनसहिता वंशो वेणुर्यत्र तस्मिन्। अत्र रासरसेत्यादिना गोपीहरिक्रीडा ...

न४

स्तुता। ननु सकल रसं गीतकं स्वितिच्छानितमः। द्रुमभेदे करस्फालितालस्व हरितालकेति विश्वः। तत्स्वं यत्नेऽपि च्छेदहारमध्यम लावधिस्तनजे कपोलस्य चेत्यमरः। आलिः पंक्तिरित्यपि। वंशोऽन्वये मतो कुलेवर्गेऽपि सास्त्रवयवे पिये त्यमरः। रासः स्यात्तु गोदु हां क्रीडेति हारावली॥६॥ श्लिष्यतीति। कामपि रामां क्रीडाभिलीनां गोपीं श्लिष्यति। आलिंगति। कामपि चुम्बति कामपि रमयति। न्हृत न से तो गेन क्रीडेति स कृष्ण। स्मितेन चातुरत्ना मपि सजेन मनोहरां गोपीं पश्यति। काचिद्वामां वामस्वभावां द्रु पवतीमनुगच्छति। अनुनयार्थमनुगतिं करोति। अत्र कृष्णे नात्रे ना दो कू जमाने ना नि र्कू तम्मन्य वेस्य परिमूयितम्।

13

१२ श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामां। पश्यति सस्मितचारुतरा मपरामनुगच्छति वामाम्॥७॥ श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम्। वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम्॥८॥०॥०॥ १२

तं१

सुन्दरी रमणी रामेत्यमरः। वामा कुवामा मन्दिरस्त्रियामिति च॥७॥ गीतसमाप्तौ कविः स्वनामनिबंधनेनाशीर्वादमाह। ज्ञाते। श्रीजयदेवेत्यादि। श्रीजयदेवकवेरिदं ललितं गीतं शुभानि वितनोतु विस्तारयतु। किंभूतं वृन्दावने अद्भुतं केशवस्य केलि रहस्यं गुप्तक्रीडा स्वरूपं तत् न एकेनैव कृष्णेनानेककामिनीनां कामपूरणादद्भुतं केशवस्य केलिरहस्यं। तत् पुनः कथंभूतं यशस्यं यशसे हितम्॥८॥ अथ सकलकलानिधिः स्वयं श्रीकृष्णः स्वयं गोपीभिः सह विहरतः केलिमाह। विश्वेषामित्या दि। हे सखि राधे मधौ वसन्ते मुग्धो मलोलुप्यो हरिः क्रीडति। किं कुर्वन्। विश्वेषां गोपीजनानामनुरंजनेनानन्दं जनय न्। पुनः किं कुर्वन्। इन्दीवरश्रेणी नीलकमल श्रेणी... कामलैः सुकुमारैरंगैः नवमन्मथस्य पा

नत्सवमुपनयन्नन्नुपुरस्थापयन्। कथंभूतो हरिः। अभितः समन्ततो ... श्रुति सा प्रत्यंगं अंगमंगं प्रति स्व
च्छन्दं यथास्यादेवं व्रजसुन्दरीभिरालिंगितः कश्च मूर्तिमान् ... शृंगाररस इव। शृंगाररसस्य ...री
रो। श्रीडास्संनवतीति मूर्तिमान् निःकुलक्रमः। अत्र शृंगाररसस्य श्यामत्वात् ... कृष्णसाम्यम्। तदुक्तं भरते। श्यामो भवति
शृंगारः सितो हास्यः प्रकीर्तितः॥ यथा मुग्धो मनोहरः शृंगाररसो वसन्ते सर्वत्र विलसतीति। अनुरंजनेन प्रीत्यैः प्रत्यका
नुरागजननेन विश्वेषामानन्दं जनयन्। पुनः किं कुर्वन् अंगैः शृंगाररसस्यांगभूतैः कटाक्षादिभिः अनुभावैः रोमांचादि
भिः सात्त्विकभावैः शोकाल्लादिभिः संचारि...

(14)

विश्वेषामनुरंजनेन जनयन्नानन्दमिन्दीवरश्रेणीश्यामलकोमलैरुपनयन्नंगै
रनंगोत्सवम्। स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यंगमालिंगितः शृंगारः स
खि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१॥०॥०॥०॥०॥०॥०॥०॥

वैश्यानंगोत्सवमनुपनयन्नन्न केवलमेतैर्विभावैश्च अनंगोत्सवमुपनयन् न केवलमेतैर्विभावैर्व्यभिचारिभावैश्च पीत्याह... करोति। इन्दीव
रश्रेणीभिः कमलपंक्तिभिः श्यामलैर्गौरांविकस्वीतलनीलैः ...निर्मलतमा नवनादिभिः कोमलैर्मृदुसाम्यादिभिः। अत्र हेतुगर्भविशेष
णमाह स्वच्छन्दमिति स्वच्छन्दं यथास्यादेवं व्रजसुन्दरीभिः रंगमंगं प्रति प्रतिमालिंगितः। शृंगाररसस्यांगानां विलासादीनां भवे
कटाक्षविक्षेपादीनां स्तम्भादिसहचरि... रूपं कपालविक्षेरोमांचस्वेदादि सात्त्विकभावरूपं शृंगाररसस्यांगमाश्रितमिति भावः।
विलासादीनामंगत्वं भरतेनोक्तः॥ विभावैरनुभावैश्च ... भावैः संचारिसात्त्विकैः। जनितो वा श्रितः स्फीतो ... शृंगार इष्यते।
तथा ... जनिविशेषैरसान्त्वेमनोहरान् तेविभावाख्यकथ्यते नाट्यशास्त्रविचारदैः॥ क्रियन्ते तैरसाः कम्पला
ताः ... तेनुभावाख्यकथ्यते नाट्यशास्त्रविशारदैः। अनुमीयतेऽलसकारी ... सेवादिभिः। ... उपवनगमन

विलासैः शृंगाररसः समुद्भवति। किंचानयनवदनप्रसादैः। स्मितमधुरवचो धृतिप्रमोदैर्मधुरैः स्वांगविकारैस्तस्यानिन
प्रयोगाव्यः। रोमारतिलकविसंकाशजातभाव्याधिर्ग्लानिर्निर्वृतिस्मृति धृतिः। उत्सुकौ विस्मयो हर्षो व्रीडोन्मादौ न जं तथा। विषादः
जडतोन्निद्रावहित्थचापलेमतिः। इति भावाः प्रोक्ताः शृंगारे व्यभिचारिणः सात्विकभावस्तु शृंगारतिलके। स्तंभः स्वेदश्च
रोमांचः स्वरभंगोथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृताः। एतेषामवान्तरलक्षणानि ग्रंथगौरवभयान्नोच्यते। अ
समकरनिहस्य। पिजसुन्दरीभिः सह मुग्धतामाश्रित्य तत्तदनुसारेण क्रीडतो पि कृष्णस्योत्कमिति भावः॥१॥ इदानीं राधां
सखी पुनरेव गमनाय तु मलयजाद्रिदुःसहतामाह। अद्युत्संगेत्यादि। श्रीखंडशैलानिलः मलयपर्वतसंबंधी पवनः ईशाचलं

१४

अद्युत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवणेछयानुसर
ति श्रीखंडशैलानिलः। किं च स्निग्धरसालमौलिमुकुलान्यालो
क्य हर्षोदयादुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥४॥

१४

ईशाचलं हिमालयमहादेवस्याचलं पर्वतं हिमालयमनुसरति। कस्मादिवाद्य मलयजस्योत्संगे क्रोडे वसन्तो ये भुजंगाः सर्पास्तेषां क
वलेन भक्षणेन जनितो यः क्लेशः संतापः तस्मादिव। तर्हि हिमाद्रिं किमिति व्रजतीत्याशंक्याह प्रालेयेत्यादि। प्रालेयं तुषा
रस्तस्य प्लवणमवगाहनं तस्य इच्छया। अत्र च शैत्यं कवलितत्वात् त्रीणि च वायुस्तद्भिन्नसंपर्कादपि केवलं विरहिणां संतापकत्वं ध्वनि
तं न केवलमिदमेव दुःखं वसन्ते परमपीत्याह। किं चेत्यादि। किंचैतस्मात्परं पिकानां कोकिलानां कुहूः कुहूरिति गिरः कुहू
रित्येवं रूपाः शब्दाः उन्मीलन्ति प्रगटीभवंति कीदृश्यः कलेन मधुरेण उत्ताला उद्भटाः। कस्मात् स्निग्ध
रसालानामाम्राणां मौलयः शिखाः तत्र जातानि मुकुलानि तान्यालोक्य वीक्ष्य जातो हर्षोदयस्तस्मात्

न्मत्स्यावा कचिद्दत्तोत्सङ्गेति पठः। तदा च वसंत इत्यर्थः। नुआस्तु लिनं इमे प्रानेजमितकायेत्यमवक्ष। उक्ता जो हिमकुण्डे स्य
मवोना न उत्कटे ग्रे हे पिवक्ता निस्पादुल्लासः तवंगमहुतिथिवद्वः॥ एना श्रीकान्तमिश्राणां पदवार्थे चन्द्रिका क
विवक्षु कुतुहार्यं कुर्वती तु विराजताम्॥ इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थनाम्न्यो त्वां
प्रथमः सर्गः॥ ॥ तत्र वचनैः सख्याम्न वेष्टितायां तस्मिन्नन्यमण्याभिः सह निर्भरं क्रीडन्तं कृष्णं मसहमाणा जा अत एव

